**दिनाङ्क :- 17.08.2026**
**प्रात: - 06:55**

## अथवार्ता:

### अमित शाह-राजस्थान-परिभ्रमणम्

केन्द्रीय-गृह-मन्त्री श्रीअमितशाह: उक्तवान् यत् युवान:, , महिला:, कृषका:, निर्धनजना: च सबला: भवेयु: इति आवश्यकम् अस्ति, येन सप्तचत्वारिंशदधिकद्विसहस्रवर्षं यावत् भारत-राष्ट्रं पूर्णतया विकसित-देशः भवितुम् अर्हति। सः अवदत् यत् नरेन्द्र-मोदी-सर्वकारः एतेषां वर्गाणां कल्याणे विकासे च विशेषं ध्यानं ददाति।

श्रीशाह: ह्य: राजस्थान-राज्यस्य अलवर-नगरे एकं कार्यक्रमम् सम्बोधयन् आसीत्। तेन राज्यस्य सप्तदशसु जनपदेषु त्रिपञ्चाशदधिकचतुश्शतोत्तर-षट्सहस्र' कोटि-रूप्यकाणां विकास-परियोजनानां शिलान्यासं उद्घाटनं च कृतम्। तेन कथितम् यत् सर्वकारेण कृषकाणां कल्याणाय अनेकाः योजनाः प्रारब्धाः। सः अवदत् यत् चतुर्दशोत्तरद्विसहस्रतम् वर्षात् षड्विंशत्युत्तरद्विसहस्रतमं वर्षं यावत् मोदी-सरकारेण कृषकाणां कृते बृहत्-योजनाः प्रवर्तिताः, न्यूनतम-समर्थन-मूल्यं च निरन्तरं वर्धितम् इति।

### नवदेहल्याम्

नवदेहल्याम् अद्य केन्द्रीयराज्यमन्त्रिणा डॉ. जितेन्द्र-सिंहेन सप्तदश जनेभ्यः 'राष्ट्रिय-अनुभव-पुरस्कारः प्रदीयते। राष्ट्र-निर्माणे विशिष्ट-योगदानं दत्तवद्भ्यः सेवानिवृत्त-कर्मचारिभ्यः एतत् पदकं अर्प्यते। एतदतिरिच्य 'पेंशन-मित्र-पुस्तिकायाः' विमोचनं तथा पंचदश वित्तकोषाणां प्रदर्शनी अपि आयोज्यते।

### एयर-इण्डिया-विमानसेवया

एयर-इण्डिया-विमानसेवया विशाखापत्तनम्-नगरस्य सर्वाः वैमानिक-यात्राः अद्य भोगापुरात् 'अल्लूरि-सीतारामराजू-अन्ताराष्ट्रिय-विमानपत्तनात्' अनुवर्त्यन्ते, यासां विमान-सङ्केतः 'VTZ' इति पूर्ववत् एव स्थास्यति। संस्थया भोगापुर-देहली-मार्गयोः मध्ये प्रतिसप्ताहं चतुर्दश-उड्डयनानां चक्रं निर्दिष्यते। अस्य आधुनिक-विमानपत्तनस्य प्रायः सप्तसप्ततिः सहस्र वर्ग-मीटर्-परिमिते प्राङ्गणे द्वाविंशतिः चेक-इन्-स्थानकानि, अष्टादश स्वचालित-भार-अर्पण-यन्त्राणि, सप्त च उड्डयन-सेतवः संयोजिताः सन्ति।

### राष्ट्रीय-परीक्षण-अभिकरणेन

राष्ट्रीय-परीक्षण-अभिकरणेन यूजीसी-नेट्-परीक्षायाः आङ्ग्ल-वाणिज्य-समाजशास्त्र-इति विषयत्रयस्य पुनः परीक्षा-सञ्चालनस्य घोषणा कृता। परीक्षायां सम्भूतानां अशुद्धीनां परिष्काराय सितंबर मासस्य नवमे दिनांके आङ्ग्ल-वाणिज्ययोः तथा सितंबर मासस्य दशमे दिनांके समाजशास्त्रस्य पुनः परीक्षा भविष्यति। विशुद्धां निष्पक्षाञ्च परीक्षां विधातुम् एषः निर्णयः समिति-अनुशंसया गृहीतः।

### ब्रिक्स

भारतं श्वः नवदिल्ल्यां द्वादशं ब्रिक्स-ऋतुदशा-मन्त्रिणां सम्मेलनम् आयोजयिष्यति। इतः प्राक् अद्य ऋतुदशा-कार्यसमूहस्य, जलवायु-परिवर्तनस्य, सुस्थिर-विकासस्य विषये सम्पर्कसमूहस्य च ब्रिक्स् वरिष्ठ-अधिकारिणां सभा भविष्यति।

षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारतस्य ब्रिक्स-अध्यक्षपदस्य विषयः स्थितिस्थापकतायाः, नवान्वेषणस्य, सहकारस्य, सुस्थिरतायाः च निर्माणम् इत्यस्ति।

**BWF चैम्पियनशिप-दिल्ली:**

भारतम् अद्यारभ्य: अगस्त-मासस्य त्रयोविंशत्यधिकतमं दिनं यावत् नव-दिल्ली-नगरे स्थिते "इन्दिरा-गान्धी-स्टेडियम्" इति स्थाने बीडब्ल्यूएफ विश्व-चैम्पियनशिप-स्पर्धाम् आयोजयिष्यति। नवाधिकद्विसहस्रतमवर्षस्य स्पर्धायाः अनन्तरमिदं द्वितीयवारं यदा भारतदेश: एतां स्पर्धाम् आयोजयति।

**पुरुष-हॉकी**

एफ्.आई.एच. पुरुष-हॉकी-विश्वचषक स्पर्धामालिकायां भारतीय-पुरुष-हॉकी-दलम् अद्य स्वस्य विजय-यात्रां निरन्तरं कर्तुं इङ्गलैण्ड-दलेन सह स्पर्धिष्यते। नीदरलैण्ड-देशस्य अमस्टेलवीन-नगरस्थित-वैगनर-हॉकी-क्रीडाङ्गणे एषा 'पूल-डी' वर्गस्य द्वितीया स्पर्धा आयोज्यते।

भारतेन स्वस्य प्रथमस्पर्धायां वेल्स-दलं त्रिणि- एकम् इति अंकान्तरालेन पराजित्य विजयस्य आरम्भः कृतः, यदा तु इङ्गलैण्ड-दलेन अपि पाकिस्तान-दलं चतुः- एकम् इति अंकान्तरालेन पराजित्य स्वस्य सामर्थ्यं प्रदर्शितम्। दलद्वयमपि विजय-क्रमाय सन्नद्धम् अस्ति, अतः अद्य एषा स्पर्धा 'पूल-डी' वर्गे शीर्ष-स्थान-निर्धारणाय अतीव निर्णयात्मिका भविष्यति। अस्यां स्पर्धायां यत् दलं विजयं प्राप्स्यति, तस्य 'पूल-डी' वर्गे स्थितिः अत्यधिकं सुदृढा भविष्यति।

**।। इति वार्ता:।।**